गगनात् स्खलितं यस्मात् गगनञ्च ततो मतम् ॥
पिनाकं दर्दुरं नागं वज्रञ्चेति चतुर्विधम् ।
वज्रन्तु वज्रवत् तिष्ठेत् तन्नाग्नौ विकृतिं व्रजेत् ॥
सर्व्वाभ्रेषु वरं वज्रं व्याधिवार्द्धक्यमृत्युहृत् ॥”
इति भावप्रकाशः ॥

वज्रः, पुं, (वज् + रन् ।) कोकिलाक्षवृक्षः । श्वेतकुशः । इति राजनिर्घण्टः ॥ सेहुण्डवृक्षः । इति भावप्रकाशः ॥ श्रीकृष्णप्रपौत्रः । यथा,—
“अनिरुद्धात् सुभद्रायां वज्रो नाम नृपोऽभवत् ।
प्रतिबाहुर्व्वज्रसुतश्चारुस्तस्य सुतोऽभवत् ॥”
इति गारुडे १४४ अध्यायः ॥
अपि च ।
“प्रद्युम्न आसीत् प्रथमः पितृवद्रुक्मिणीसुतः ।
स रुक्मिणो दुहितरमुपयेमे महारथः ॥
तस्यां ततोऽनिरुद्धोऽभून्नागायुतबलान्वितः ।
स चापि रुक्मिणः पौत्त्रीं दौहित्रो जगृहे ततः ॥
वज्रस्तस्यामभूद्यस्तु मौषलादवशेषितः ।
प्रतिबाहुरभूत्तस्मात् सुबाहुस्तस्य चात्मजः ॥”
इति श्रीभागवते १० स्कन्धे ९० अध्यायः ॥ * ॥
(विश्वामित्रपुत्त्रभेदः । यथा, महाभारते । १३ । ४ । ५१ ; ५९ ।
“वल्गुजङ्घश्च भगवान् गालवश्च महानृषिः ।
रुचिर्व्वज्रस्तथाख्यातः सालङ्कायन एव च ॥”
“विश्वामित्रात्मजाः सर्व्वे मुनयो ब्रह्मवादिनः ॥”)
विष्कम्भादिसप्तविंशतियोगान्तर्गतपञ्चदशयोगः । तस्यायनवदण्डा वर्ज्जनीया यथा,—
“व्याघाते पञ्च विष्कम्भे सप्त शूले च नाडिकाः ।
गण्ड व्याघातयोः षट् च नव हर्षणवज्रयोः ॥
वैधृतिव्यतिपातौ च समस्तौ परिवर्ज्जयेत् ।
शेषा यथार्थनामानो योगाः कार्य्येषु शोभनाः ॥”
इति ज्योतिस्तत्त्वम् ॥
अत्र जातफलं यथा,—
“गुणी गुणज्ञो बलवान् महौजाः
सद्रत्नवस्त्रादिपरीक्षकः स्यात् ।
वज्राभिधाने यदि चेत् प्रसूतो
वज्रोपमः स्याद्रिपुकामिनीनाम् ॥”
इति कोष्ठीप्रदीपः ॥

वज्रकं, क्ली, (वज्र + संज्ञायां कन् ।) वज्रक्षारम् । इति राजनिर्घण्टः ॥ (यथा, सुश्रुते चिकित्सितस्थाने ९ अध्याये । तैलं वज्रकमभ्यङ्गार्थं ॥) सर्व्वतोभद्रचक्रान्तर्गतसूर्य्यभोग्यनक्षत्रात् चतुर्विंशनक्षत्रात्मक उपग्रहः । यथा,—
“सूर्य्यभात् पञ्चमं धिष्ण्यं ज्ञेयं विद्युन्मुखाभिधम् ।
शूल्यञ्चाष्टमगं प्रोक्तं सन्निपातं चतुर्द्दशम् ॥
केतुमष्टादशं प्रोक्तमुल्का स्यादेकविंशतिः ।
द्वाविंशतितमं कम्पं त्रयोविंशञ्च वज्रकम् ।
निर्घातञ्च चतुर्व्विंशसुक्ता अष्टावुपग्रहाः ॥”
इति ज्योतिस्तत्त्वम् ॥

वज्रकङ्कटः, पुं, (वज्रः कङ्कटो देहावरणमस्य ।) हनूमान् । इति हेमचन्द्रः । ३ । ३७० ॥

वज्रकण्टकः, पुं, (वज्रस्य कण्टकमिव तदारकत्वात् ।) स्नुहीवृक्षः । इति जटाधरः ॥ कोकिलाक्षवृक्षः । इति राजनिर्घण्टः ॥

वज्रकन्दः, पुं, (वज्राकारः कन्दोऽस्य ।) वज्रकन्दः । इति रत्नमाला ॥ सकरकन्द आलु इति भाषा ॥

वज्रकपाली, [न्] पुं, (वज्रकपालोऽस्यास्तीति । इनिः ।) बुद्धविशेषः । तत्पर्य्यायः । हेरम्बः २ हेरुकः ३ चक्रसम्बरः ४ देवः ५ निशुम्भीशः ६ शशिशेखरः ७ वज्रटीकः ८ । इति हेमचन्द्रः ॥

वज्रकालिका, स्त्री, (वज्रोपलक्षिता कालिका ।) मायादेवी । इति हेमचन्द्रः ॥

वज्रकेतुः, पुं, (वज्रं केतुश्चिह्नमस्य ।) नरकराजः । यथा,—
“गते वशिष्ठे नरकः शीघ्रं विस्मयसंयुतः ॥”
इत्युपक्रम्य ॥
“इति यासीन्मतिस्तस्य वज्रकेतोस्तदा चला ।
दूतञ्च प्राहिणोत् यत्तं बाणस्य नगरं प्रति ॥”
इति कालिकापुराणे ३८ अध्यायः ॥

वज्रक्षारं, क्ली, (वज्रसंज्ञकं क्षारमिति ।) क्षारविशेषः । तत्पर्य्यायः । वज्रकम् २ क्षारश्रेष्ठम् ३ विदारकम् ४ सारः ५ चन्दनारः ६ धूमोत्थम् ७ धूमजाङ्गकम् ८ । अस्य गुणाः । अत्युष्णत्वम् । तीक्ष्णत्वम् । क्षारत्वम् । रेचनत्वम् । गुल्मोदरार्त्तिविष्टम्भश्रमप्रशमनत्वम् । सरत्वञ्च । इति राजनिर्घण्टः ॥ (भक्षणीयौषधविशेषः । तद्यथा,—
“सामुद्रं सैन्धवं काचं यवक्षारं सुवर्च्चलम् ।
टङ्कणं सर्ज्जिका क्षारं तुल्यं सर्व्वं विचूर्णयेत् ॥
अर्कक्षीरैः स्नुहीक्षीरैरातपे भावयेत् त्र्यहम् ।
तेन लिप्तार्कपत्रञ्च रुद्ध्वा चान्तः पुटे पचेत् ॥
तत् क्षारं चूर्णयेत् पश्चात् त्र्यूषणत्रिफलारजः ।
जीरकं रजनी वह्निं नवभागं समं समम् ॥
क्षारार्द्धमेतं सर्व्वञ्च एकीकृत्य प्रयोजयेत् ।
वज्रक्षारमिदं सिद्धं स्वयं प्रोक्तं पिनाकिना ॥
सर्व्वोदरेषु गुल्मेषु शूलदोषेषु योजयेत् ।
अग्निमान्द्येऽप्यजीर्णेऽपि भक्ष्यं निष्कद्वयं दयम् ॥
वाताधिके जलं कोष्णं घृतं वा पैत्तिके हितम् ।
कफे गोमूत्रसंयुक्तमारनालं त्रिदोषजे ॥”
इति वैद्यकरसेन्द्रसारसंग्रहे शोथाधिकारे ॥ * ॥)

वज्रचर्म्मा, [न्] पुं, (वज्रवत् दुर्भेद्यं चर्म्म यस्य ।) खड्गी । गण्डकम् । इति राजनिर्घण्टः ॥

वज्रजित्, पुं, (वज्रं जयति तस्याघातसहनेनेति । जि + क्विप् । “ह्रस्वस्य पिति कृति तुक् ।” ६ । १ । ७१ । इति तुगागमश्च ।) गरुडः । इति हेमचन्द्रः । २ । १४५ ॥

वज्रज्वाला, स्त्री (वज्रस्य ज्वाला ।) वज्राग्निः । इति हलायुधः ॥ (यथा, मात्स्ये । १२९ । १४ ।
“वज्रज्वालान्तरमयः शाल्मलश्चान्तरालकृत् ॥”)

वज्रटीकः, पुं, (वज्रेण वज्रकपालेन टीकते प्रकाशते इति । टीक + कः ।) वज्रकपाली नामकबुद्धः । इति त्रिकाण्डशेषः ॥

वज्रतुण्डः, पुं, (वज्रं वज्रतुल्यं कठिनन्तुण्डं यस्य ।) गरुडः । गणेशः । इति त्रिकाण्डशेषः ॥ गृध्रः । मशकः । इति राजनिर्घण्टः ॥ (वज्रतुण्डधरे, त्रि । यथा, भागवते । ५ । २६ । ३५ ।
“यस्त्विह वा अतिथीनभ्यागतान् वा गृहपतिरसकृदुपगतमन्युर्दिधक्षुरिव पापेन चक्षुषा निरीक्षते तस्य चापि निरये पापदृष्टेरक्षिणी वज्रतुण्डा गृध्रकङ्ककाकवटादयः प्रसह्योरुबलादुत्पाटयन्ति ॥”)

वज्रदन्तः, पुं, (वज्रमिव कठिना दन्ता यस्य ।) शूकरः । मूषिकः । इति शब्दमाला ॥

वज्रदशनः, पुं, (वज्रमिव कठिनं दशनमस्य ।) मूषिकः । इति हेमचन्द्रः । ४ । ३६६ ॥

वज्रद्रुः, पुं, (वज्रवारको द्रुः ।) स्नुहीवृक्षः । इत्यमरः ॥

वज्रद्रुमः, पुं, (वज्रवारको द्रुमः ।) स्नुहीवृक्षः । इति शब्दरत्नावली ॥ (तथास्य पर्य्यायः ।
“सेहुण्डः सिंहतुण्डः स्याद्वज्री वज्रद्रुमोऽपि च ।
सुधासमन्तदुग्धा च स्नुक्स्त्रियां स्यात् स्नुहीगुडा ॥”
इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

वज्रधरः पुं, (धरतीति । धृ + अच् । वज्रस्य धरः ।) इन्द्रः । इति हलायुधः ॥ (यथा, महाभारते । ३ । ११३ । २३ ।
“अरुन्धती वा सुभगा वशिष्ठं
लोपामुद्रा वापि यथा ह्यगस्त्यम् ।
नलस्य वा दमयन्ती यथाभूद्
यथा शची वज्रधरस्य चैव ॥”)
जिनविशेषः । इति त्रिकाण्डशेषः ॥ (वल्लापुराधिपतिराजविशेषः । यथा, राजतरङ्गिण्याम् । ८ । ५४० ।
“उपरागे नवे सर्व्वे पार्व्वतीयास्त्रयो नृपाः ।
चाम्पेयो जासटो वज्रधरो वल्लापुराधिपः ॥”)

वज्रनिर्घोषः, पुं, (वज्रस्य निर्घोषः ।) वज्रजनितशब्दः । इति हलायुधः ॥

वज्रनिष्पेषः, पुं, (वज्राणां निष्पेषः संघर्षध्वनिः ।) वज्रनिर्घोषः । तत्पर्य्यायः । स्फूर्जथुः २ । इत्यमरः । १ । ३ । १० ॥ “द्वे वज्रजनितशब्दे । अन्योन्यसंघट्टनात् भयं साग्निमेघखण्डं वज्रमिव वज्रं तस्य साटोपध्वनौ द्वयमिति केचित् ॥ द्वौ स्फूर्ज्जौ वज्रनिष्पेषे । निष्पेषः संघट्टध्वनिः । अशन्याघात इत्येके । निष्पेषचूर्णनं साटोपध्वनिश्च इह तु ध्वनिरभिप्रेतः । श्रुत्वा विस्फूर्जथुप्रख्यं निनादं परिदेविनीति भट्टिः । टुओश्वि गतिवृद्ध्योरिति अथुः निपातनात् दीर्घः । स्फूर्ज्जेरथुरिति दीर्घार्थं परसूत्रम् । केचित्तु दीर्घं नेच्छन्ति । केचिद्विभाषया दीर्घमिच्छन्ति । वज्रस्य निष्पेषो वज्रनिष्पेषः षौ पिष ऌ चूर्णने घञ् । निष्पेषो द्विमूर्द्धन्यः ।” इति भरतः ॥

वज्रपाणिः, पुं, (वज्रं पाणौ यस्य ।) इन्द्रः । इति त्रिकाण्डशेषः ॥ (यथा, महाभारते । ६ । १९ । ७ ।
“एष व्यूहामि ते व्यूहं राजसत्तम दुर्ज्जयम् ।